दंष्ट्राकरालानि च ते मुखानि

दृष्ट्वैव कालानलसन्निभानि ।

दिशो न जाने न लभे च शर्म

प्रसीद देवेश जगन्निवास ॥ ११.२५ ॥

daṁṣṭrākarālāni ca te mukhāni
dṛṣṭvaiva kālānalasannibhāni |
diśo na jāne na labhe ca śarma
prasīda deveśa jagannivāsa || 11.25||

अमी च त्वां धृतराष्ट्रस्य पुत्राः

सर्वे सहैवावनिपालसङ्घैः ।

भीष्मो द्रोणः सूतपुत्रस्तथासौ

सहास्मदीयैरपि योधमुख्यैः ॥ ११.२६ ॥

amī ca tvāṁ dhṛtarāṣṭrasya putrāḥ
sarve sahaivāvanipālasaṅghaiḥ |
bhīṣmo droṇaḥ sūtaputrastathāsau
sahāsmadīyairapi yodhamukhyaiḥ || 11.26||

वक्त्राणि ते त्वरमाणा विशन्ति

दंष्ट्राकरालानि भयानकानि ।

केचिद्विलग्ना दशनान्तरेषु

संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ ११.२७ ॥

vaktrāṇi te tvaramāṇā viśanti
daṁṣṭrākarālāni bhayānakāni |
kecidvilagnā daśanāntareṣu
sandṛśyante cūrṇitairuttamāṅgaiḥ || 11.27||

यथा नदीनां बहवोऽम्बुवेगाः

समुद्रमेवाभिमुखा द्रवन्ति ।

तथा तवामी नरलोकवीरा

विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ ११.२८ ॥

yathā nadīnāṁ bahavo'mbuvegāḥ
samudramevābhimukhā dravanti |
tathā tavāmī naralokavīrā
viśanti vaktrāṇyabhivijvalanti || 11.28||

यथा प्रदीप्तं ज्वलनं पतङ्गा

विशन्ति नाशाय समृद्धवेगाः ।

तथैव नाशाय विशन्ति लोकाः

तवापि वक्त्राणि समृद्धवेगाः ॥ ११.२९ ॥

yathā pradīptaṁ jvalanaṁ pataṅgā
viśanti nāśāya samṛddhavegāḥ |
tathaiva nāśāya viśanti lokāḥ
tavāpi vaktrāṇi samṛddhavegāḥ || 11.29||